र्य्याः। अष्टे वत्या गायत्री। अभिनयेन दर्शयन्नाह। याश्च मूरापः सूर्य्ये सूर्य्यस्य
उपसमिपे विभक्ति व्यत्ययः। यन्निश्च अद्भिः सह सूर्य्याति। वा शब्दः समुच्चये। ता
आपः नोऽस्माकं मध्वं हविश्चं तु तर्प्पयंतु। हविश्च तितर्प्पनार्थः॥ २४॥ सोमस्यपाईरति। ह
कं डन प्रदेशं प्रति आनयनमुपावहरणं। हृदत्वा। सोम्यनुष्टुप। हे सोम। हृदये निश्च ८६
यात्मिकायेकुष्ठे मनसे संकल्पविकल्पकायत्वोऽपावहरामि। दिवे देवलोकाय प्रा
ये च॥ एतत्रयं मेस्यादिति। सूर्य्याय सूर्य्यादि दे वेभ्यश्च उपावहरामि। त्वं योपावहृतः।

इमं यज्ञं कुर्व्वद्दिविक्कृत्वा होत्राः वषट्कारयाज्ञिमोव्रह्मजीन देवेषु यच्छवक्षीति॥ २४॥ विवं
हे सोमराजन। त्वं सर्वाः प्रजा उपावरो हा॥ अधिपत्याधिपतिष्ठा। विस्रज्या पतिष्ठते। विश्वाः
अग्निवाद प्रजाः त्वां उपावरो हन्तु। प्रस्तुत्यान स्तोनादिभिः जुहोति। शृणोतु। त्रिष्टुप् लिंगोक्त देवता॥
अग्निं समिधासमित्पूर्वया आकृत्या मम हवं आ जानं शृणोतु। आपः धिषणा देवी वाचो दे
व्यः शृण्वंतु। मम हवं। धीसानिन्यो धीसादिन्यो वा धिषणाः हे ग्रावाणः नूपमपि आत
शृण्वंतु। केइव। यज्ञं विदुषइवा द्विद्वांसइव उपमाध्यीय उपरिष्ठाद् उपचारोनकारः॥
दिवि वाउ धीय यथा शृण्वंति। सविता वमे हवं। शृणोतु॥ २६॥ अप्सु जुहोति देवीरापः पं
क्तिदेवत्या। हे आपो देव्यः। अपान्नपात्। तं इयो वः पुष्माकं ऊर्मिः अप्सं वातः कल्लोलः
कीदृशाः हविष्य यज्ञियः इंद्रियावान् वीर्य्यवान्। दीर्घ छांदसः मदितमः मदयिन्त
मः। तं ऊर्मिं शुक्रेपेभ्यः शुक्र उपलक्षणं शुक्रादि सोमग्रहपायिभ्यो देवेभ्यो देवत्रा

अग्र
८१

देवान्प्रियायिनं स्तोदेवमनुष्येत्यादिना द्वितीयार्थे त्राप्रत्ययः। ये त्वां देवानां यूयं मा
नामस्थः॥२७॥ कार्ष्णिरसि। अनुष्टुप् ॥ पथा विनियोगं देवता। मैत्रावरुणं त्वं मस
नोऽपमयो हति। हे आज्य त्वं कार्ष्णिः कृष्णविलेखने॥ कृष्टं असि। देवेन मह्लितमित्यर्थः
तेन वमसेन गृह्णोति। समुद्रस्य। अपो वै समुद्र इति श्रुतिः। वसतीवरीलक्षणस्य स
मुद्रस्याद्रिन्यै अक्षीणतां येत्वां ऽनयामि। ऽहं स्तोमि। वसतीवरीणां वर्धनाय तां
आपो गृह्णंते॥ संस्पर्शयति समापः। आपो वसतीवरीलक्षणाः। अद्रिर्मैत्रावरु
णवमसस्याभिसमगमत। संगच्छतां। ओषधीर्मुञ्जादिका ओषधीभिः समगमत।
अपां कारणमृतत्वात्तासामपि योगोस्तु॥२८॥ जुहोति। समग्रे। गायत्र्याग्नेयी। हे
अग्ने यं मर्त्यमनु जो पृत्सु युद्धेषु त्वं अवाः अवसि। रक्षसि। वाजेषु हविर्लक्षणे
ष्वन्नेषु यं च जुनाः। अभिगच्छसि। जुनाति गत्यर्थः॥ स नरः शाश्वतीः। शाश्वतीः इषः ६

अन्नानियंतालक्ष्म्यालक्ष्मीं तमेतदाघ्रदात्तत्वात् ॥९८॥ अद्रिमादत्ते । ग्रावाणं । देवस्य त्वा । अग्र
दोग्र स्तोमि । त्वं रावा भिः । रादाने वनिप । आकूतीनां दक्षिणानां यदा ता ब्रि । एत ध्यान दृष्टं रा
सते । आकूती श्च दक्षिणाश्चेति श्रुतिः ॥ विंवा । इमं अध्वरं इंद्राय इन्द्रार्थं एवं विधं कवि । कुरु
की दृवं । गभीरं महान्तं । उत मेनपतिना यो वितेन सोमेन सुधृतमं । साधु अभिषुततमं ।
सुपूर्वः षुञ् अभिषवे । ल्यपि तकार लोपः ॥ दीर्घत्वं नमपि प्रत्यये छांदसं । उर्जस्वंतं
रसवंतं । मधुस्वादुना रसेनोपेतं । पयस्वंतं । पयः स्वादुना रसेनोपेतं । निग्राभ्यासु वा वप
ति । सोमेन सह स्तोत्व वमेगृहीता वसतीवर्यो निग्राभ्या संज्ञाः ता हृदिस्पृशः यजमानः
पठतीत्यर्थः ॥ निग्राभ्याः स्थः । तस्मात् इंद्रेणापूयं उरसि गृहीताः तस्मान्निग्राभ्या उच्यं
ते । देवश्रुतः । देवैः श्रुताः स्थः । तस्माद्वकुनेभ्यः सत्पः मां तर्पयत समासव्यासेतावुः ।
तदेवाह । मनो मे । मनआदीन् मम तर्पयत । तागणान्तरसं ध्वानां । मम गणाश्च मा वितृ व ताविन

गायत्रीश्येनो भूत्वा दिवः सोममाहरदिति श्रुतिः। ४ मितस्य सोमस्य शान्तेर ५

ऊ.ऋ.हु. तगतत्स्तोमामामर्वतु। इन्द्रो मेर्ग्यापूरितास्त्वपि। अनुरक्तगणो भवेयं इत्यर्थः॥ ३१॥ सोमं मिमी

८८ ते। इ झायत्वा। वसुमने रुद्रवते आदित्यवते भवनत्रयदेवतायुक्तायेत्यर्थः॥ अभिमाति कृत्

त्रुहं त्रेसपत्नो वा अभिमातिरिति श्रुतिः। इ झाय। सोममन्ते हि ग्रहोर्मिः शुंदत्ति। श्येनायं

सोमस्याहं श्येपेन रूपिणा पेगायत्र्या वनाय स्थाष देवन पुष्टि दाने इ ग्रयेवत्वां मिमे इति स

र्वत्रशोधः॥ ३२॥ मितो लंभनं। यत्ते। सोमी विपरीता बृहती। आत्यू तमस्य मन्त्रस्य निदानं

यदा किल देवां हविः सोमो ऽभूद् तदा लोकं जुतिस्वस्तोन्नृत्यदधा तामसामने मिः क्रियते

हे सो हेतैमतव दिवा पृथिव्यां उरौ विश्वा त्वे अंतरिक्षे च ज्योतिः। तेन तत्वा स्वो नज्योतिषा ८८

अस्मो यजमानाय। जघ्न्यार्थे चतुर्थी। अस्य यज्ञे राये ऋत्विजां दक्षिणा प्राप्तये स्वशरीरं

इरुकृधि। विंवा दात्रे यजमानाय। अधिवोचः। कृत्वा नो ऽहमागत इति ब्रूहि॥ ३३॥ आसिं

वति निम्नाभ्याः सोम इति शेजः। ध्याया। स्वः। उपरिष्टाद्बृहती। निग्रीभ्या आपो देवता॥

यायूयंईदृश्यः स्थनस्थाजाः द्विप्रकारिणपशिवावा। वृत्रउदरः। तुर्वतिर्वधकर्मा। वृत्र[illegible]स्य
हंत्र्यः। राखोगृत्तीः। राखोधनंऋजिरं तीतिवा। छंदसीतिदीर्घः। अमृतस्य धनस्य पत्नीः पाल
यित्र्यः हे देवीः। दे वमनुष्येत्यादि। २ता द्वितीयर्थे त्रा प्रत्ययः। देव्यत्रा यूयंइमंयज्ञं देवत्रा
देवान्नयत। किंच। अश्रुत्युपणाउपहूताः सत्यः सोमस्य पिबत॥३४॥ प्रहन्वति। सोमः हे सो
म त्वंमामेघीः मात्वंकंपंकृथाः। ऋज्रीषस्त्वा। असंवेद्धिषवं सोमंसंबोध्य द्यावापृथिव्यौ
संबोधयति। हे धिषणे द्यावापृथिव्यौ युवां वीड्वी सती वीडुशब्दो दृढवचनः। दृढेसत्यौ वी
डयेथां। आत्मानं दृढंकुरुतां। किंच। ऋज्रीषस्थां। अस्मिन्सोमेरसंधारयेथां। अनेन
ग्रात्वष्टा यजमानपाप्मा हतः। नतुसोमः॥३५॥ निग्रामंवाचयति प्राग्वाकू। हाभ्या
न्गम्यो सुप्लिकु बृहतीभ्यां प्रथमासौमी द्वितीयाऐंद्री सोमो मिथुनमिच्छति तत्रदेवाः दि२
संपादितवंतः। तदेतदत्रास्मृतं। हे सोम प्राकू प्रागंचनाः। अपाकू अपागंचनाः। उदकू उदगं

उत्तर. ८८

कनाः अघरत् कुत्र अघरां वनाः। एवं सर्वतो दिशः त्वां आधावंतु। आगच्छंतु परस्परं इति मा
जमानाः। हे अंशो वस्व भागैः सोमं नि पर एपालनपूरणयोः। पूरय। अरीप्रजाः संविदां संविदता
प्रजावा अरीरिति श्रुतिः। अस्माकं सोमस्य भागमंसर्वे जानंतु॥३६॥ त्वमंग। हे इंद्र हे सविष्ठ ब
लिष्ठ त्वं देवः सन् मर्त्यं यजमानं अंग द्धि प्रं प्रशंसिषः प्रशं स [illegible] सि। अतः हे इंद्र ते तव
वचो ब्रवीमियत्। हे मघवन् त्वदन्यः मर्डिताः यजमानानां सुखयिता नास्ति। मृड सुखं वान
ए॥३७॥ ॥इति श्री षष्ठोध्यायः॥ ॥६॥ वानस्पतये उपांसुग्रहस्य पुरोरुक्। अनु
ष्टुप्। प्राणदेवत्या। गृह्णाति। हे उपांशुग्रह। त्वं वानस्पतये प्राणो वपस्वा आगच्छ। प्राणो वै ८८
वानस्पतिरिति श्रुतिः॥ की त्वां वृष्णो वर्धितु ४ सोमस्य अंशुभ्यो रवं जाभ्यां स्वधे वर्धुः सोम
खंड वयं गृह्णीत्वा उपांशुग्रहं गृह्णाति। कल्वा गभस्तिभ्यां अस्व वैन्तु पाणिभ्यां पूतः पाणी
वे गभस्तीति श्रुतिः कु॥ द्वितीयं गृह्णाति। देवः सवान त्य देवो देवांस्त प्यीयितु मल्लं॥

येषां भागोऽस्ति तेभ्यो देवेभ्यः वपस्व प्रवृत्तिं कुरु ॥ शान्ततीयं गृह्णाति मधुमतीः रसयुक्ताः

ओषधीः अन्नानि नः कृधि । अस्माकं कुरु । अंशुभूतं सोमं निदधाति । सोम त्वं उतापूर्वं अमन्त्रं गृहीत

स्वाहा । स्वाहेत्युच्चारणैः कामान् तिं कुरु व्याख्यातं ॥ ॥ जुहोति । स्वांकृतोऽसि । स्वयंकृतो

यकारलोपश्छान्दसः । विश्वेभ्य इन्द्रियेभ्यः दिव्येभ्यो देवेभ्यः पार्थिवेभ्यो मनुष्यादिभ्यश्च

सकाशात्स्वयमुत्पन्नोऽसी त्यर्थः । मनः प्रजापतिः त्वो अश्नुव्याप्नोतु प्रजापतिर्वै मनः

प्रजापतिष्ट्वाश्नुतामिति श्रुतिः ॥ हे सुभव सोम नमः वषट् स्वाहा सूर्याय स्वाहा काररूपेण त्वां जुहो

मीति शेषः । प्राणमुपमाध्विमध्यमपतिध्यो देवेभ्यो मरीचिपेभ्यो ऽर्थीय त्वां उपमाज्जीतिशे

षः । वाङ्गुदिग्विद्यमंशुमभिचरन् । जुहुयात् । देवांशो हे देव सोमांशो यस्मैव षा यत्वां

अग्र० १००

इडप्रार्थयामिईड्विन्ध्येभणाकर्म्मा। ततसत्यंअस्त्वितिशेषः। असौशत्रुःउपविष्णुताडपरिग
तेनभंगेनश्रामर्द्नेनहतःसन्फटूत्रिफलाविशारणे। द्विवंतःइलयोरेवंच। विशीर्यतु।
अभिचारेस्वाहास्थानेफट्प्रयुज्यते। पात्रासादनं। प्राणायत्वांसादयामीतिशेषः। उपांशु
सवनंसादयति। व्यानायत्वांसादयामितिशेषः।३। अंतर्यामिगृह्णातिउपयामगृहीतो
ऽसिउपयामयतीत्युपयामोग्रहः। तेनगृहीतस्त्वंअसि। हेमघवत्अंतर्म्मध्येयच्छपात्रं
यच्छानिगृह्णीष्वापात्रस्थंसोमंचपाहि। रायःपशून्उरुष्यउरुष्यतिरक्षणार्थः। मद्
पशवोवैरायइतिश्रुतिः। आद्रुषःयजस्व। इषोन्नानितत्वमघवत्वात्लोक्षणयाप्रजा
उक्ताः। प्रजावाइषइतिश्रुतिः। यायजूकाः। कुरुइतिश्रुत्याव्याख्यातं।४। अंतस्ते। १००
अंतर्यामपुरोरुक्। विष्णुपामग्रवदेवत्या। हेमघवन्तेतवांतर्मध्येद्यावापृथिवीओउरु

अंतरिक्षं त्वा दधामि स्थापयामि ॥ स त्वं अवर्दैः पृथिवीस्थैः परिधिस्थानैः देवैः सह देवैः स
गूः समानप्रीतिः सन् अंतर्यामे अस्मिन् ग्रहे मादयस्व । हर्षय स्वात्मानं ॥ ५ ॥ जुहोति स्वा
कृतोसि । व्या ॰ स्वाहा । पात्रमासादयति उदानाय त्वा ॥ ६ ॥ ऐंद्रवायवं ग्रहं स्तौति । आ
वायोः । त्रिष्टुप् । वायुदेवत्या । हे वायो त्वं नोऽस्माकं उपसमीपे आभूष आगम्य आक्रमस्व ।
किं॰ त्वां शुचिपाः । शुचिं पवित्रं प्रथमं वषट्कृतं सोमं पिबतीति । केनाहमत्याक्रमेद्
ति चेत् । हे विश्ववार । विश्वं वृणोति विश्वैर्वा व्रियत इति वा तथासंबुद्धौ । ते सहस्रं नियुतो
श्वाः संति । किं च । हे देव । यस्मात् स्य सोमस्य पूर्वपेयं प्रथमं वषट्कारस्य दाने पूर्वपानं
त्वं हि जन्मार यसि । तत्र मद्यं सदनीयं अंधः अन्नं ततः उपयामि । उपगयामि । उनिपातः ॥ वा
यवेत्वेति । दैवतादेशाः ॥ ७ ॥ द्वितीयः पुरोडं इंद्रवायू । ऐंद्रीवायवी गायत्री । हे इंद्रवायू इमे

सोमाः सुताः अभिषुताः अतः कारणात् युवां प्रयोभिः अस्मैः उप आगतं उपागच्छतं प्रपूर्वि
स्पइन्नेग तावित्यस्य शब्दं तस्य भिक्षिपरे छौ दस्मः तस्यसः । ततो रुत्वादि । प्रयक्षिरश्वैरित्यर्थ अवि
व । इदं वः सोमाः । वायुवांउशन्ति ह्रियत ७ । वा■वेइंद्र वायुभ्यां त्वांग्र स्लामितिशेषः । सादयि
ति । एषः पृथिवील क्षणः ॥ तेतव योनिः स्थाने । सजोजोभ्यां सहप्रीतिभ्यां त्वां सादयामीतिशे
षः ॥ ८ ॥ मैत्रावरुणस्य पुरोरुक् । अयं वां । गायत्री मैत्रावरुणी । हे मित्रावरुणौ वां युवयोः अ
यं सोमः सुतः अभिषुत्त अभिषवे । विंयुवां । ऋतावृधौ । यज्ञस्य सत्यस्य वा वर्धयितारौ । अतः इ
हममेवं हवमाज्ञानं श्रुतं शृणुतं । इतएवार्थो । मित्रावरुणाभ्यां त्वांग्र स्लामितिशेषः । कं
डितः ॥ ९ ॥ पयसा श्रणाति । अग्रेहि दुग्धं मुंचतीत्यर्थः । राया वयं मैत्रावरुणी त्रिष्टुप् उपरि
तदश्रवणाद्यदोऽत्राध्याहारः ॥ १० ॥ इह कामदुघां प्रार्थयते मंत्रदृक् पयाधेन्वाग्र हे सत्याव
यं राया धनेन ससवांसः संभक्ताः सेतः मदेम । वनजनसंभक्तौ । हि ष्यामः । कथमिव । हव्येन १०१

देवाइव।

देवतामित्र्यायवसेनगावइवाहेमित्रावरुणौयुवंयुवांतांधेनुंविश्वाहासर्वदानोऽस्मभ्यंधत्तं
कीदृशीं।अनपस्फुरंतीं।स्फुरतिर्गत्यर्थः।अपेत्यायानरीतंरगच्छतिसाअपस्फुरंती।नतादृशी
अनन्यगामिनीमित्यर्थः॥४॥एजन्ने।ऋतायुभ्यांत्वांसादयामि।ऋतयाज्ञेनमित्रः।आयुर्वरुणः
वृत्त्वाऋतंचऽत्तहिमित्रोऽवस्तोह्यतंवरुणएवायुरितिश्रुतिः।पदकारस्तु।ऋतेयज्ञंका
मयेतेतेऋतायू।ताभ्यां॥५॥आश्विनस्यपुरोरुक्।यावांकशा।गायत्री।अश्विनौ।हे
अश्विनौ।वांयुवयोर्याकशा।वाक्।कशेतिवाङ्नामसु।साहिप्रकाशयत्यर्थान्।कीदृशीमधु
मती।मधुब्राह्मणोपनिबद्धत्वशंसारूपा।सूनृतावती।प्रियासत्याच।तयाकशयायुवांय
ज्ञंमिमिक्षतं।सिंचतं।दातुंमिहसेचने।अश्विनौहियज्ञस्यधुर्यौअतएवमुच्यतेऽपयाः।अ
श्विभ्यांत्वाऽगृह्णामि।एषतेयोनिर्माध्वीभ्यांत्वांसादयामि।मधुब्राह्मणंयाभ्यामधीयातांतेमाध्वी
उच्यते।इकारोऽत्रतद्धितः।दध्यङ्हवाआभ्यामाथर्वणोमधुनामब्राह्मणमुवाचेत्यादि

भ्रग॰
१०२

कृतिः ॥ १४ ॥ अनुवंग्ट स्तनाति ॥ तस्य पुरोरुक् ॥ तं प्रत्नथा ॥ जगत्यनिरुक्ता प्रकरणे ब्र सोमः सुश्रो
मि धीयते हे सोम यासु क्रियासु ॥ तं इंद्रं अनु त्वं वर्द्धसे पुनः पुनः संक्रियसे तासु तं इंद्रं वृजनं
यज्ञफलं बलं वा नेवदोहसो दुह प्रपूरणे प्र द्रावयति ॥ यजमानाय ॥ वृजिनमिति बलनाम
॥ किं ॥ इंद्रं ॥ उपेक्षतातिं ॥ उरुक्षय विस्तारं ॥ यद्वा वृक उपेक्षाभ्यां तिलतातिलो छंदसीति तद्धिः
प्रशंसायां ॥ उपेक्ष्य प्रशस्यं ॥ बर्हिषिदं ॥ बर्हिषि सीदति इति तं ॥ स्वविदं ॥ धा ॥ लोकवेत्तारं स्वनिवा
सत्वात् ॥ प्रतीचीनं ॥ आ... त्मनोऽभिमुखं ॥ धुनिं ॥ नृणां कंपयितारं ॥ अग्नुं वीवृधे ऽयं तंस
र्वस्य ॥ कथं दोहये ॥ प्रत्नथा ॥ चिरपरुत्परारति ... प्रगस्य छंदसि लोपश्चात्प्र
जमनं वं प्रत्नं ॥ प्रत्नशब्दः पुराणवचनः ॥ थाउपमार्थीयः ॥ प्रत्नपूर्वविश्वेमात्थाल् छंदसी
ति इवार्थे थाल्प्रत्ययः ॥ चिरंतनानां मुनीनां भृग्वादीनामिव यजमानस्य दोहसो पूर्वथा
पूर्वेषां साध्यादीनामिव ॥ विश्वथा ॥ सर्वेषामिव ॥ मुनीनां इमथा ॥ इदानीतनानामिव यज
मानानां ॥ उप ॥ शंड ॥ यत्वांग स्तनामि ॥ शंडोऽसुरः ॥ एष ॥ वीरतो वीरत्वं पाहि सादयामीति

१०२

शंजः। यूपशकलेनापमार्ष्टि॥ अपमृष्टः अपमार्ज्जनीकृतोऽस्य शंडः। निःक्रामति देवाः शुक्रा
पाः शुक्रो ग्रहस्यार्थिनः त्वां प्रणयंतु। यज्ञनस्थानं प्रापयंतु। दक्षिणस्यां वेदिश्रोण्णावासाद
यति। अनाधृष्टासि। अनुपसिंसितासि॥ १२॥ यूपदेशं गच्छति। सुवीरः। हेग्रह त्वं शोभनवी
रः सन् यजमानस्य वीरान् प्रजनयन्। रायस्पोषेण यजमानं अभियोजयेः। परीहि। परिग
च्छ। अपरेण यूपमरत्नीसंभवतः। प्रतिप्रस्थातृवेद्यूपासंजग्मानः। अयं शुक्रः ग्रहः दिवा पृथि
व्या च संगच्छमानः सन् शुक्रः शोचिषा शुक्लया दीप्त्या प्रजा विभर्तीति शेषः। यूपशकलेनि
रस्यति। यूपस्य शकल द्वयमस्ति प्रोक्षितमप्रोक्षितं च। अप्रोक्षितं। निरस्तः शंडः। आहवनी
ये प्रोक्षितं प्रास्यति यूपशकलं। शुक्रस्याधिष्ठानं असि ग्रहस्य॥ १३॥ जपति। अच्छिन्नस्य।
हे देव। हे सोम। आच्छिन्नस्य सं ततस्य सुवीर्यस्य शोभनप्रभावस्य रायस्पोषस्य तेतवद
दितारो वयं स्याम। यज्ञाव त्रिराषास्पते। जुहोति। ला प्रथमा। त्रिष्टुब्वेद्दी। यस्यं द्रस्य सा
प्रथमा। सोमसंस्कृतिः। किंभूता संस्कृतिः विश्ववारा संस्कृतिः। सवनोमित्रोऽग्निः। अयस्य

उ॰ब्रा॰ १०३

न्द्रस्य प्रथमः। अन्यदेवानां प्रमुः॥१८॥ स च प्रथमः। बृहस्पतिः विचिकित्वान् चेतनावान्। यस्यै
न्द्रस्य [illegible] तस्मै इंद्राय सुतं अभिषुतं सोमं त्वा पाकारे एण आजुहोत। हे ऋत्विजः। जप
ति। त्वं पंतु। होत्राः प्रीणंतु। होत्रशब्देन होत्रिकया अथाच्छंदांस्यभिधीयंते। या होत्राः
मद्वः। मधुस्वादस्य सोमस्य प्रविष्टाः सुप्रीता अश्नायत। यस्मात् त्वा हाकारेण सुहुताः॥
प्रत्यङ् उपविशति। अयाड् अग्नीत्। अपाहीत्। अग्नीत्। एवं होतुरा वषट्॥१५॥ मंथिनं ग्र
ग्र ह्णाति। अयं वेनः सोमोऽनया त्रिष्टुभाऽभिदेवमभियज्ञं चावस्थितिः स्तूयते। आदि
देवंतावद् ब्राह्मणा संस्तूयते। अयं वेनः रजसो विमाने उदकं रज उच्यते। उदकस्य
निर्माणकाले प्राप्ते ग्रीष्मांते पृश्निगर्भाः अपश्चोदयत। प्रेरयति। प्राश्निर्घर्मलोकमा
दित्यो वा गर्भो यासां ताः। किंभूतः वेनः। वेनः कांतः। वेनति कांतिकर्मा ज्योतिर्जरायुः
स्थानीयं यस्य सः। इदानीं अभियज्ञस्थितमुच्यते। विप्रा मुनि निमत्तिपूर्विकाभिर्वा गिः १०३

इमं सोमं विहन्ति। विहन्तिरर्चनकर्मा। किं। इमं। अपास्पंदमाना। तां सूर्यस्य च संगमे ग्रही
ताभिः। अद्भिर्वसतीवरीलक्षणाभिरभिषुतं। शिशुं न। शिशुमिव। वसतीवर्यश्चापः
अपां सूर्यस्य संगमे गृह्यंते। ता वसतीवरीर्वै स्यंदनमानानां ग्रह्णीयाद्दिवा ग्रह्णी
यादिति श्रुतिः॥ उप। मर्कीयलां गृह्णामि। मऽर्कोऽसुरस्याहा॥ सक्तुभिः श्रीणाति। मंथि
ग्रहे सक्तून्क्षिपति। मनो न येषु। त्रिषु पा॥ क्षिपः विपश्चितोऽध्वर्यूः छांदसः प्राति
पदिकैकदेशलोपः। मनो नाम मन इव क्षिप्रं। तिग्मं। उत्साहयुक्तं। तेजतेरुत्साहकर्म
णः। येषु हवनेषु सोमहोमेषु। आशव्याश विइति कर्मनाम। कर्मणा निमित्त
भूतेन वनुथ॥ वनुतः। व्याप्नुतः। पुरुषव्यत्ययः। ऊर्वं तोऽशु कामं घि हो मेग धृतो
तेष्वेव होमेषु। यः अध्वर्युः आदिशं प्रतिदिशं शर्याभिरंगुलीभिः गभस्त्योः पाणि
स्थितस्य सतः। अस्य मेथिनः आश्रीणीतं। किंभूतो यः। नुविन्द्रमत्तः। नुवाति

वरुनामान्नमोनिषननामावरुणनोमहा दाक्षिणाः यद्यपित्रत्राध्वर्युप्रतिप्रस्थानावौ
समानकर्माणौतथापियः श्रयणंकरोतिसएवप्रधानइत्याशयः ॥एष०। प्रजाः याजमानाः
पादि। यूपशकलेनापमार्ष्टि अपमष्टोमर्कः। निःकामति। देवाः मे। धिग्रहपायिनः।
त्वांप्रणयंतु। यज्ञतिस्थानंप्रापयंतु। अनाधृष्टासि पूर्ववत। पूर्ववत्त्रयोदशकंडि
कावत ॥१७॥ पूर्वेण गच्छति। उत्तरमार्गेण यूपदेशंप्रतिगच्छतीत्यर्थः। सुप्रजाः। हेमं
थिन् सुप्रजास्त्वांप्रजाजनयन्। रायस्पोषेण यजमानं अभियोजन्परीहि। अपरेण
यूपमवत्तासंधत्तः। संजग्मानः। पूर्ववत्त्रयोदशकंडिकावत। मंथाग्रहः मंथिनो
दीप्या। यूपशकलं प्रास्यति। निरस्तोमर्कः। आहवनीये प्रास्यति। मंथिनः ॥१८॥
आग्रयणंगृह्णाति। ये देवासः। वैश्वदेवी त्रिष्टुप्। हे देवासः। देवाः ये यूपमेकादश
संख्यामहिना। महाभाग्येन दिविस्थः। भवथ। पृथिव्यांअधिष्ठपदि। वा स्थ। अप्सुक्षि

तोऽक्षय्यनिर्निवासार्थः । अंतदिक्षनिवासिनः स्थ । आपइत्यंतस्मिन्नाम सुपश्चितं । महिनुति
सर्वत्र संवध्यते । सर्वत्र हि महाभाग्याविशेषात् । तेयूयंइमं आग्रयणसद्क्षणं यज्ञं सुषवे । सि
वर्ध्वंऽपयाम । त्वं आग्रयणोसि नाम्ना । स्तुत्यर्थं नामग्रहणं । स्वाग्रयणः साध्वाग्रयणः य
स्मिन् त्वयिग्रहीते अग्रे प्रथमं अयनं वा वः गमनं ऽत्सार्थः । अध्वर्योसंजातः स त्वं यज्ञं दिः ७
व यज्ञपतिं पाहि । किंचा । विष्णुः पत्नीक्षिष्वाची देवी ताइंद्रियेण वीर्येण त्वां पातु । त्वं व
विष्णुं पाहि । स वनानि त्रीण्यपि । अभि सर्वतः पाहि । सर्वेषु सवनेषु संगृह्यते आग्रय
णः ॥२०॥ सोमः पवते । ग्रहणपात्रेषु गच्छति । स्वकीये कर्मणि प्रवर्तते । किमर्थं । अस्मै
ब्रह्मणे क्षत्रियाय उत्पत्तिस्थित्यर्थं । सुन्वते यजमानाय । कामप्राप्त्यर्थं । इषे अन्ना
य । ऊर्जे क्षीरादिरसाय । अद्भ्यः ओषधिभ्यः । ओजधीभ्यो यवादिभ्यः उत्पत्तिस्थितये । द्या
वापृथिवीभ्यां । प्रीणनाय । सुभूताय साधुभवनाय । विश्वेभ्यो देवेभ्यस्त्वा गृह्णामि । एष वः ।

उ॰ अ॰ पृ॰
१०५
105

विश्वेभ्यो देवेभ्यस्त्वां सादयामि॥४१॥ उ कस्त्वां गृह्णाति उपयामा इंद्राय त्वां गृह्णामीति
संबंधः। कथंभूताय। बृहद्वते। बृहत्साम। वयस्वते। यौवनवते किंभूतं त्वां उ उक्थाव्यं
उ उक्थ्यपानि मैत्रावरुण ब्राह्मणाच्छंस्यच्छावाकसंबंधीनि स्तवति रक्षतीति उक्थाव्यं तत्र
स्थस्य विनियोगः। हे इंद्र यन्ते तव बृहद्वय उ ज्जिति यौवनं तस्मै त्वां गृह्णामि। अत्र तवेतीं
द्रेति युष्मदामंत्रिताभ्यां प्रत्यक्षत्वं इंद्रस्य ते तव इति च युष्मदस्मदो पि प्रत्यक्षेण वोच्य
ते। तयोः सामर्थ्यं कथमिति चेत् यस्मै इंद्रस्य बृहद्वयस्तस्मै त्वां गृह्णामीति यदि इंद्रस्य
व्यत्ययेनेति ब्रूमः। त इत्यस्य पदस्य अस्येति पदेन व्यत्ययः। इंद्र इत्यस्य इंद्रस्येति पदेन व्य १०५
त्ययः। विश्वेभ्यो देवेभ्यस्त्वां गृह्णामि॥ एष ते उ कस्त्वां सादयामि। उ कस्त्वां वि
गृह्णामि। विभजंति। विभागं। देवेभ्यः। अर्थात् यत्त्वां देवाव्यं। देवतर्पणं यज्ञस्य श्रीः युजं।
अनवच्छिन्नाग्राक स्मिकर्मेषु रक्षिता या समाप्तिः सा यज्ञस्यायुः। अविच्छिन्नसमाप्त्यै गृह्णामि।

यद्वायज्ञोयजमानस्यशरीरं।यजमानायुषो॥२१॥उत्क्रुविग्रहणेषुद्वितीयोमंत्रविकल्पोमि
त्रावरुणग्राहणाद्छंदस्यष्वावाकानांपथासंख्यं।मित्रावरुणाभ्यांत्वाइत्यादियोमंत्रा:
अनवः।वरकानांमंत्रविकल्पा।तदुहवरकाष्वर्य्यवोविगृह्णीतीत्यादिकयाश्रुत्यो
का:॥उक्थ्यादिषुतृतीयसवनेउक्थ्यविग्रहमंत्राइंद्रावरुणाभ्यांत्वाइत्यादय:स्प
ष्टा:॥२२॥अवंग्रहंगृह्णाति॥मूर्द्धानंदिव:।वैश्वानरीत्रिष्टुप्।वैश्वानरश्चात्रस
र्वात्मनास्तुयते।यंवैश्वानरंएवंविधंदेवाइंद्रादय:जनयंत।किंदृशं।दिवोमूर्द्धानं
शिर:॥सूर्य्यात्मनावस्थितं।पृथिव्या:अवपृथिवीशब्देनांतरिक्षंउच्यते।अंतरि
क्षस्यअरतिंअलमतिंपर्य्याप्तमतिं।तत्रह्यसौस्थितोयथाकालंवृष्ट्याभूतानिपुष्णा
ति।पृथिवीतिअंतरिक्षनामासुपठितो।अंतरिक्षं।आकाशं।आप:पृथिवीति।ऋते
यज्ञेजातंउत्पन्नंअरणिद्वयात्।अग्निं।कविं।क्रांतदर्शिनं।संम्राजं।ईश्वरं।जनानां

उ॰अ॰पू॰ अतिथिंआसन्नआस्येमुखेआपात्रंआस्मिन्मुखेपीयतेअनेनेतिपात्रं।विज्ञायतेति
१०६ चमसोदेवपानइति।चमसेनहवाएतेनभूतेनदेवाभक्षयंतीतिश्रुतिः॥यद्दन
इत्यादिनासूत्रेणआस्यशब्दस्यआसन्आदेशःसप्तम्याश्चोदशोलोपः
॥२४॥उपयामः।ध्रुवोसिनाम्ना।ध्रुवानांवस्तूनांध्रुवक्षितिर्ध्रुवनिवासः
।अच्युतानांवत्समेवध्रुवतमः।अच्युतेक्षियतेयत्रनिवसतिअच्युतक्षित्।
अतिशयेनाच्युतक्षित्।अच्युतक्षित्तमः॥सादयति।एषवैश्वानरायत्वांसादयामि
ध्रुवंनिनयतिहोतृचमसेसिंचति।ध्रुवंध्रुवेणबृहती।पूर्वोऽर्द्धर्चः॥ध्रुवदेव १०६
त्यः।उत्तरऐंद्रः।ध्रुवेणएकाग्रेणमनसावाग्यतान्मौनेनोच्चारणेणप्रवणेयाध्रुवं
त्वांसोमंप्रतिआनयामिअवसिंचामि।सहिहोतृवैचमसेऽवसिच्यतेद्वादशोमं

106

स्त्रे।अथावस्तिकृसोमानांनोऽस्माकंविशोमनुष्यान्।असपत्नाःसंपन्नरहितान्।
समनसःसमनस्कान्।कृत्यायुक्तान्इंद्रइतइंद्रएवकरत्।करोतु।२५॥विप्रुड्हो
मः।यस्तेद्रप्सःसौमीविप्रुट्प्रायसुरंतः।स्वाहादेवानामुत्क्रमणमसीतियजुः।हेसो
म।यस्तवद्रप्सःविप्रुट्।रसैकदेशःस्कंदति।भूमावन्यत्रवापतति।यश्चतवअंशुः
खंडःधिषणयोरुपस्थात्।अभिषवणफलकयोरुत्संगात्।सोमखाउवानापादी
अंशुः।ग्रावच्युतः।ग्राव्णापतितः।अध्वर्योर्वापवित्राद्वायःपरिस्कंदति।यतःकुत
श्चित्।तंतवविप्रुषंअंशुंवाअग्नौजुहोमि।मनसासंकल्प्य।वषट्कारेणस्वाहा
कारेणचेत्यर्थः।तृणंचात्वालेप्रास्यति।तत्ता वेदःसकाशात्तृणेनवयंअध्व
र्युगत्तस्तातिएकंचात्वालेक्षिपति।अन्यताउत्क्रान्तुरग्नेतृष्णं।देवानांउत्क्रमणमसि।

उ०प्र०रु० १०७

107

यात्वालंउच्यते। अतोहि देवाःस्वर्गंलोकंमनुप्रोदक्रामन्निति श्रुतिः॥२६॥ ग्रहाग्र हानुदर्श
यत्यवकाशान्वाचयन्यजमानस्योपांशुप्राणरूपेण दर्शयति। प्राणायमेत्यादि मं
त्रोप्यवकाशसंज्ञास्तान्वाचयन्नध्वर्युर्यजमानायउपांश्वादिग्रहान्दर्शय
ति। प्राणायमोहे उपांशो यस्त्वंस्वभावत एव वर्चोदाः सत्वंमे प्राणाय व
र्चसे पवस्व। प्रवर्तयस्व। एवमन्येऽप्यवकाशमंत्राः। उपांशुसवनं। ग्रावाणं
व्यानाय। अंतर्यामं। उदानाय। ऐंद्रवायवं। वाचे॥ मैत्रावरुणं क्रतुदक्षाभ्यां
कामतस्समृद्धिमपि। आश्विनं श्रोत्राय। शुक्रामंथिनौ युगपत्। चक्षुर्भ्यां मे १०७
शुक्रामंथिविजयंद्विवचनं॥१७॥ आग्रयणं। आत्मने। उक्थ्यं। ओजसे। ध्रुवं।
आयुषे। पूतभृदाधवनीयौ युगपत्। विश्वाभ्यः। उत्तरान्तःस्तोमस्त्वात्र वि

शोभोमांडइ॥२८॥ अथ द्रोणकलशं। इन्द्रेद्रोणकलशे। दक्षिणेनोऽध्वर्युः॥ कोसि।
वर्द्धमानोऽभिगन्तु घ्नुष्व। प्रजापतिर्नूपं द्रोणकलशमाह। त्वं कः प्रजापतिरसि। कत
मः। अतिशयेन प्रजापतिः। कस्य प्रजापतेरसि। को नामा। प्रजापति नामासि। किं च। यस्य
ते नाम वयं मन्महि। जानीमः। यं त्वा सोमेन अतीतृपाम। तर्पितवन्तः। सोऽस्मान्वि
दिननाम्नः करोतु। तर्पयतु कामैरिति शेषः॥ जपति। भूर्भुवः स्वः॥२९॥ सातुग्र
हांस्त्रयोदश गृह्णाति। अध्वर्युप्रतिप्रस्थातारो गृह्णीतः॥ त्रयोदशभिर्मंत्रैः
मंत्रास्तु। नामान्येव। ऽपयामम। मधुमाधवौ वासंतौ मासौ। मधुप्रमुखमं त्रवसं
तेऽत्पद्यते॥ शुक्रश्च शुचिश्च ग्रैष्मौ। शोचतेः शुष्यत्यर्थस्य। नभो नभस्यो वार्षिकौ। न
स्वित्रसूर्यो भातिमेघ प्रावृष्यौता। इषोर्जौ शारदौ। तत्रान्नं दध्यादिरसश्च प्रचुरं

ऋ॰ग्र॰टी॰ भवतीसहस्रसहस्योर्हेमंतिकौसहस्तेः प्रसहनार्थस्या अभिभवस्य सो शीतेनातपस्त
१०८ पस्योशैशिरौ। एतयोर्विशिष्टंतपतिसूर्यः। अंहसस्पतिस्त्रयोदशोमासः। अंह
यी पापे। अयंद्वादशस्वपिपतति॥३०॥ ऐंद्राग्नमग्रहंगृह्णाति॥ इंद्राग्नी। गायत्र्यैंद्रा
108 ग्नी। हे इंद्राग्नी युवांगीर्भिस्त्रयीमहत्वणाभिः वाग्भिः स्तुतं अभिषुतंसोमं प्रति आग
तं। आगच्छतं। किं। सोमं। नभः आदित्यमिव वरेण्यं वरणीयं। नु क्षिप्रं उपमानं। किं
वयुर्वा। धियायजमानबुध्याइषिता प्रेषितो संतौ। अस्य सोमस्य कर्मणा घच्छी
तं पिबतं। उप॥३१॥ इंद्राग्निभ्यांत्वांगृह्णामि। एषते। इंद्राग्निभ्यांत्वां आसा १०८
दयामीतिसर्वत्र वोभ्यांग्रहस्यद्वितीयो मंत्रविकल्पः। आघाये अग्नीद्रा
गायत्री। ये यज्ञानः। अग्निं आ इंभते इंभते इष्टि सोमपशु वानु मासैः आदाप

यंतिइंद्रश्चीदीपैतोद्य इत्यनर्थकः निपातः। येचर्वं हि। आनुषक अनुपूर्व्येणाक्र
मेणस्तरंति। आनुषगितिनामा। अनुपूर्वात्षंजसंगे इत्यस्मात्क्विपि अनिदि
तामितिन लोपः। अतोरकारस्य दीर्घः छांदसः। अनुषक् डपयुपदि लगूमि
त्यर्थः। अनुपूर्वस्यानुषक् भवति लेरुक्तो। किंच पुवाइंद्रः येभ्यांतेभ्यां इत्यर्थे
येभ्यो। सख्या। नेतरेभ्यां। अयज्वतो। डप॰॥ २२॥ वैश्वदेवं गृत्स्ताति। ॐमासः॥
वैश्वदेवी गायत्री। हे विश्वेदेवासः दाशुषो दत्तवतो हविर्द्धिं यजमानस्य सुतं सो
मं पातुं भूयमागत। आगच्छत। किं भूताः। अवतेः पालनार्थस्य तर्पणार्थस्य वा क
र्तरि कर्म्मणि वा अविसिविसिविशुविभ्यः किदिति मन्प्रत्यये ज्वरत्वर
रेत्यादिना ऊठि ऊमास इति मा प्रत्ययेन गुणः। जस्य। आज्जसेरसुक्। ॐमासः

उ॰ऋ॰ अवितारः। तर्पितारस्तर्पनीया वा। बर्हिष्यो मनल्पास्तान्धारयंति तैर्या त्रिष्टुबं
१०९ त। वर्हिणीष्टतः। दीर्घश्छांदसः। दाश्वांसः। इदमस्मै दयमिति चेतसा दत्तव
वंतः। दाशृ दाने। दाश्वान्साह्वान्मीढ्वांश्चेति निपातः। उप॰। द्वितीयो
मंत्रः विकल्पः। विश्वेदेवासः। वैश्वदेवी गायत्री। हे विश्वे देवासः। यूप
मागत। आगत्य च मेममिमं हवमाह्वानं शृणुत। श्रुत्वा चेदं अस्मदीयं
वर्हिः आनिषीदत। उप॰॥ ३४॥ मरुत्वतीयं गृहं गृहीत्वा तीं इंद्र मरुत्वः।
मरुद्भिः सहितः इंद्रो देवता। इतः। उत्तरं वतस्त्वष्टाणामृषयो विश्वामि १०८
त्रार्षी। प्रागमा हे इंद्रा। ते हे इंद्र हे मरुत्वः मरुद्भिः सहिता। मरुत्वं सो मः संबु
से च छंदसीति रुत्वं। इंद्र यज्ञे सोमं पाहि पिब। शार्यातेराजनि यथा सुतस्य सोमस्य

स्वांशं त्वं अपिबः। पीतवान् असि। सर्यातो मानवस्य स्यापत्यं सार्यातः। शर्यातो ह वा
इमं मानवो ग्रामेण चचारेति श्रुतिः॥ किंच। हे सूर स्तुयज्ञाः कल्याणयज्ञाः कवयः
तव प्रणीतीत्या प्रणयेन सुपं भुलुगिति पूर्वसवर्णः। शर्मन्नूशरणे यज्ञगृहे
तव त्वां आ विवासंति। विवासतिः परिचर्यायां। ३५॥ द्वितीयं मरुत्वतीयंश
स्त्रा। ति। मरुत्वंतं वयं तं इंद्रं इह यज्ञगृहे हुवेम आह्वयामः॥ किंभूतं मरुत्वं ऊ५:
तं। मरुत्सहितं। वृषभं। वर्षितारं। वावृधानं। वर्द्धमानं। अकवारिं। अकुत्सितारिं।
शत्रवो ऽपि यस्य अकुत्सितास्तादृशादयः। यद्वा अकुत्सितैश्वर्यादिव्यं। घालोकजं॥
शासं शासनवंतं। शासितारं वा। विश्वासाहं। सहतिरभिभवार्थः। विश्वस्य सहं। दी
र्घः छांदसः। स्वधर्मच्युतस्य सर्वस्याभिभवितारं। उग्रं। उद्गूर्णवज्रं। सहोदां। व
लस्य दातारं। किमर्थं हुवेम। नूतनाय अवसे। ऊमर्थसि। असे नित्यादिवा असमप्रत्ययः

यु०अ०
११०
110

अविरंतनायाअवनाय।ऊप०॥त्वतीयंमरुत्वतीयंग्रहत्वातियजुषा।ऊप०मरुतांओ
जसेऽस्वकायमोजोनिधायेंद्रंप्रतिमरुतअयातास्ततोऽनेनगृहीतेनसवल्लो
जातास्तदेनयजुर्वदति।त्वांगृह्णामि॥३६॥द्वितीयोमंत्रविवरणःसजोषाइं
द्रः।हेशूरत्वंमरुद्भिःसजोषाःसमानपात्रभोजासगणः।वृत्रंहंता।विद्वा
न्सन्सोमंपिब।पीत्वाचशत्रून्जहि।हतावशिष्टांश्चमृधःसंग्रामानअ
नुप्रदस्व।प्रेरयस्व।अथनोऽस्माकंविश्वतःसर्वतःअभयंकृणुहि।ऊप०॥
३७॥मरुत्वान्।हेइंद्रत्वंरणाययुधायमदायचसोमंपिब।मरुत्वान्।मरु ११०
द्भिःसहितःवृषभःवर्धित।विसोमं।अनुष्वधं।अनुपश्चात्स्वधान्वन्नंपुरो
डाशमानामंयद्धविपयस्यालक्षणंयस्य।आसते।किंच।जठरेमध्वःमधु

सोममित्यौपमिकं माघ्नतेः मधुस्वादस्य सोमस्य ऊर्मिं जठरे। आसिंचस्व। हेतु
माह। त्वं प्रतिपत्सुतानां प्रतिपत्सु इति तिथिषु अभिषुतानां सोमानां त्वं राजा
सि। किमुत चतुर्दश्यां तेऽभिषुतानां त्वदर्थमेव सर्वासु तिथिषु सोमः सूयत
इत्याशयः। छंदोगानां प्रतिपद्विद्यते तदभिप्रायमेतत्॥ उप०॥ ३४॥ माहेंद्रं
ह्वाति। महान्। त्रिष्टुप्। माहेंद्रीयं इंद्रः वीर्याय वा इंद्र वीरकर्मणे वर्द्धते।
किंभूतः। महान् प्रभावतः। तथापि मन्वत। मनुष्यवत्। आहूयमान्। न आगछ
ति। आगत्य च। चर्षणिप्राः। मनुष्याणां पूरयिता। कामैः। उत द्विबर्हाः। द्विशब्दे स
प्तम्यंत उपपदे वृहू वृद्धावित्यस्माद्धसुन्। द्वयोः स्थानयोः वीर्येण परिवृढः। इं
द्रः। न ह्यन्योऽन्तरिक्षे वीर्येण परिवृढः शक्नोति वर्द्धितुं। नापि दिवि आदित्या

द्रमात्मपरिग्रहीतुं । इति हेतो द्विवर्हाः अपि द्वयोः स्थानयोः परिवृढो मध्यमेव स्थानेउ
त्तमे वा सहोभिर्बलैः अमिनः अपमानेन निष्ठाः यद्वा मिनोतेर्वधकर्मणि दृण् सिदी
डुप्याविभ्यो नगिति बाहुलकात् नकु । नञ्समासः । अमितमात्रः । अतोलितवलः ।
यद्वा अनुपहिंसितः प्राप्तुवलैः । अस्म च कु । अस्म दभिमुखं यथा स्यात्तथा अ
स्मान् प्रत्यैतीति । अस्मच्च कृक्रियाविशेषणं । विश्वग्देवयोश्च टेरित्यद्यादे
शः ॥ सोऽस्म दीर्घैः कर्तृभिः स्तूयमानः ॥ उरु प्रमाणजः । पृथुश्च विस्तरेण । सुकृ
तः शोभनकृतानि प्रायशः भूतानि भूयात् । उप० ॥ ३९ ॥ द्वितीयो मंत्रविकल्पः । महांत
गायत्री । माहेंद्री । वर्द्धिमान् पर्ज्जन्य इव सपथो धाराभिर संख्याभिर् परिछिन
संख्यः ॥ ओजसा महान् यइंद्रः वत्सस्य । वसनशीलस्य यजमानस्य स्तोमैः स्तू

यमात्मैः॥ वाक्षेपे ॥ वदंति ॥ ऽपण ॥४०॥ दाक्षिणान्निति तत्संज्ञका होमाः ॥ उदु होति ॥ ऽतुअ
नर्थकः ॥ ऽ ॥ त्यं ॥ सौरी गायत्री ॥ केतवः ॥ किरणाः जातवेदसं ॥ जातप्रज्ञानं त्यं प्रसिद्धं
॥ त्यदशब्दः तदर्थायः तं सूर्यं देवं वहंतीति ॥ किमर्थं विश्वाय दृशे ॥ षष्ठ्यर्थे चतुर्थी
जगतो दर्शनाय ॥ ४१ ॥ द्वितीयं तु होति ॥ चित्रं ॥ सौरी त्रिष्टुप् ॥ सूर्यश्चात्र परा
पररूपेणावस्थितः स्तूयते ॥ उदयकालावारभ्य तावद् पररूपेण स्तूयते ॥ चित्रमिति
क्रियाविशेषणं ॥ यच्चित्रं आश्चर्यं चायनीयं पूजनीयं वा उदगात् ॥ नैशं तमोऽपहत्यो
द्गच्छति ॥ देवानां रश्मीनां अनीकं समूहं मित्रा ॥ दिकुस्य समस्य जगतः ॥ चक्षुः उद
ऽदयं हि तत्पाणि अतिव्यंस्यंते ॥ यद् द्यावापृथिवी अंतरिक्षं च आप्राः ॥ प्राः प्रा
पूरणे ॥ उदयानंतरमेव स्वतेजसा पूरितवान् ॥ अथ स्तान्त विशेषणानि ॥
मंडलानि प्रायाणि नपुंसकान्युक्ताथ पररूपेण स्तूयते ॥ स सूर्यः जगतो

ऊ.प्र.पृ.
११२

जंगमस्यतस्थुषःस्थावरस्यच आत्मा ॥४२॥ आग्नीध्रेजुहोति। आग्नेय्यैर्न ॥४३॥ अयंत-
ऽकृतार्थौ। वतस्तोप्येतौ ॥ यज्जुरंताः स्वाहाकारेणाग्नेरण ॥४४॥ शासंतिप्यन्नाभि
मंत्रयते। दक्षिणतः स्थितो दक्षिणाः गवादीः रूपेणवः। अग्रूयेपशवआत्मनो
दानमसहमाना अन्यानि रूपाणि। आददिरे। तान् देवाः स्वैः रूपैः प्रत्युपातिष्ठंत।
ततस्तेस्वरूपवाजग्मुः ॥ एतन्निदानमस्य मंत्रस्य। रूपेणमत्त्योवः। युष्मत्संव
धिरूपं अभ्यागा। अभ्यागतः सर्वैः किं वा। विश्ववेदाः सर्वज्ञः। तु योवृत्तवोयुष्मा
न्विभजतु। यथार्हमृत्विक्षुतं विभागं करोतु। रूपं च कृतस्य यज्ञस्य यथाप्रेत। प्रगच्छु
ता। वंद्र दक्षिणाः। वंद्रस्तु वर्णं यजमानहस्तस्थं द्वितीयं दक्षिणायाः सांताः। वंद्र द्वितीयदक्षिणा
इतिप्राप्ते शाकपार्थिवादित्वादुत्तरपदलोपी समासः। सदोऽभिगच्छति। विस्वदक्षिणेऽस्यते।
स्वः। देवजानं। हे दक्षिणे त्वया सोपानभूतया विपश्यपश्यामि। अंतरिक्षं पितृयानमार्गं

स०
११२

यविपश्यपश्यामि।पुरुषमव्यत्ययः।श्लात्यात्रमध्यमपुरुषस्थानेऽन्तमपुरुषोव्याख्यातः।
सदसिस्थितानस्त्रा ह्मणान प्रेह्णैतेपतस्य।दक्षिणामेतेततपायत्वंकुरु।यथासदस्यैः
पूरितेरितितिरियसे॥४५॥आग्नीध्रीघंगच्छति।ब्राह्मणपथं।अघास्मिन्नूदिनेआब्रा
ह्मणंविदेयं।लभेयं।विदतेराशीर्लिङि।लिङ्याशिष्यङि।तिअङ॥अनोयपः
सलोपः।यलोपः।गुणश्चेतिकृतेविदेयमिति।किंनूतं।पित्र्मंतं।विसिष्ठेनपित्रा
जातंपैत्र्मंत्यं।यस्यपितामहप्रभृतयःऋषिवंश्याःश्रोत्रियाःसपैत्र्मत्यः।ऋ
षिमंत्राणांव्याख्यातारं।आर्षेयंज्ञात्वाप्रवरेअज्ञानंसुधातुदक्षिणां।शोभ
नोधातुःसुवर्णंदक्षिणाःयस्यतं।सुवर्णंदक्षिणानीयदायते।दक्षिणांददाति
अस्माज्ज्ञाताः।हेदक्षिणा।यूयंस्माज्ञाता।अस्मानिहइता।सत्यादेवत्रादेवानगच्छत।

द्द यमायायमनूपाय। दात्रे हयोः श्वयाएधि ॥४७॥ अथ यदन्यद्ददाति तदनेन प्रतिगृह्णाति ॥ ०

ततो यज्ञफलं साधयंत्यः प्रदातारं यजमानं प्रकर्षेण दातारं आविशत ॥४६॥ इतउत्तरं
पंच प्रतिग्रहमंत्राः ॥ हिरण्यं प्रतिगृह्णाति। अग्नये त्वा। हे हिरण्य अग्निरूपाय मह्यं वरु
णः त्वां ददातु ॥ वरुणेन हि पूर्वं हिरण्यमग्नये दत्तं। अतस्तेनैवात्मनो गृह्णामो न रिक्था
मि इति दैवतादेशः। सोऽहं अनेन विधिना गृह्णानोऽमृतत्वं अशीय व्याप्नुयां। त्वं वदाते
आयुः एधि भव। मह्यं प्रतिग्रहीत्रे मयः सुखं एधि। एवमग्रेपि। गां प्रतिगृह्णाति। रुद्रा
य रुद्ररूपाय मह्यं हे गौः त्वां वरुणो ददातु। सो। त्वं दात्रे त्वकु भव। अश्वं प्रतिगृह्णाति ५
को दात्। कः पुमान् दत्तवान्। एकः प्रश्नः कस्मै अदात्। द्वितीयः प्रश्नः। कामोऽदात्। का ११३
माय दात्। द्वौ प्रतिप्रश्नौ यथासंख्यं। एवं चेत् काम एव दाता कामः। प्रतिग्रहीता वा अतो ब्रवीमि।
हे काम एतत्सद्द्रव्यं ते तव। त्वमेव ददासि। प्रतिगृह्णासि वा केन वित्तकारणेन प्रयोजनेन ॥
४८॥ ॥इति मैत्रमानवे सप्तमोध्यायः॥ ॥ आदित्यग्रसं स्वर्वीत्यत्यर्थं प्रतिप्रास्याता मी

दित्यपात्रेण द्रोणकलसोऽदुपयामगृहीतोऽसीति गृहीत्वा द्विदेवत्याननुजुहोति। तत्रैते मंत्राः
उपयामगृहीतोऽसि आदित्येभ्यस्त्वा गृहीत्वा मीति शेषः। आदित्यस्थाल्या पात्रेण पिदधाति। विष्ण। हे उरुगाय
उरगमनएष ते तव सोमः समर्पितः। तं रक्षस्व॥ तत्र त्वा मादभन्नाइति आदित्यदेवत्या यजुरंता
आदित्येभ्यस्त्वेति यजुः॥२॥ द्वितीयं गृह्णाति। कदाचनेति आदित्यग्रहायजुरंता॥
आदित्येभ्यस्त्वेति यजुः॥ कदा शब्दः कालवचनः। चनेति निपातः। पूर्व्वार्थो। हे आदि
त्य। कस्मिन्न हनि पुनः प्रयुत्सि पुष्य प्रमादो प्रमाद्यसि। उदयतापर्यो। कप्रमादो ननुग्रह
न्त्राणिभुकुर्वन॥ नैकदाचिन दपि। एवं का कुनो व्याख्येयं। यद्यो कदा चा कदापि। न प्रमाद्य
सीति। उभे देवम ध्यसं वंधिनी जन्मनी नियासि। नितरा र दाससि। तुरीयेत्यपिविमति। कोनि हि
शः। हे आदित्य अमृतं अनश्वरं विज्ञानानंद स्वभावं तुरीयं सवनं तेतव इं द्रियं वीर्यं दिवि
रविमंडपेआतस्थौ आस्थितं। आदित्येभ्यस्त्वां गृहीत्वा मीति शेषः॥३॥ द्वाभ्यां गृह्णाति। दधि

उ.श्रू. ११४

114

आदित्यगृहपतिना यज्ञो देवानां विशुपायत्नुरेना। आदित्यैस्त्वेति यजुः। यतो यज्ञो देवा
नामादित्यानां सुखं सुखं कर्तुमिच्छतीति। ततः हे आदित्यास हयूयं मृडयंतः सुखयन्तो
नः भवतः। त्वयोः शातप्रत्ययः छान्दसः॥ किं च। वः युष्माकं सुमतिः अर्वाची अस्मद
भिमुखा आववृत्यात्॥ आववृत्याम्भवतु। अंहुः पापकारी। विततम् अपार्थम् अंहोरपि पा
सुमतिः। सा वरिवोवित्तरा अतिशयेन धनस्य लब्धी असत् भवतु सा अस्मदभिमु
खी आववृत्यात्॥ वरिवदिति धननाम॥ ४॥ उपांशुस्पवनेन गृह्णन्ति सूक्ष्मयति उ
पांशुः सूयते येन। तत्संज्ञकेन अश्मना दधिग्रहयो देवकं करोति॥ विवस्वत्। तमांसि
विवासयतीति विवस्वान। हे विवस्वन्। आदित्य एष ते सम पीथः सोमपानं। ११४
तस्मिन् मत्स्व तृप्तिं कुरु। मन्दतृप्तौ। सोमम् अवेहा यतपत्नी। अदस्मै जगती। आशी
र्मा न पत्नी विषया। अदितिः सत्यनामा। हे नरः मत्विजः यूयं अस्मै वसेव अस्त्र

तन।अश्रद्धां कुरुत।तन।द दात्वेन।नोऽनर्थकः।किं वक्तः।फल आशी दा आशी नो दाता
रा दंपती पत्नी यजमानौ वामं वमनीयं अश्नुत।यज्ञफलं व्याप्नुतः।किं वा वसुधनं
विंदत।इदं हेव पुमान् पुत्रो जायते दुहिता ऽपि पुत्रश ह्येनो व्यत।इति पुमानिति॥
विशेषता।किं वा वसुधनं विंदते लभते।अपा एतौ छंदसि समानार्थौ।अथातेतनं
विश्वाहा सर्वाणि एवहानि अप्रपोनिः पापः सन्नमुहेव वरएव ते वर्द्धते॥५॥सावि
त्रं गृह्णाति।तामम ह्या॥सा विती त्रिष्टुप॥हे सवितः।अद्य उप अपरं श्वः उपा
वसनीयकाले॥श्वाउपाशे सनीयः काल इति यास्कः।किं वदुनाऽनेन दिव
दिवे अहनि अहनि अस्माभ्यं अस्माकं।वामं वननीयं सावीः।प्रसूयाः।किं वा
हदेव नूरे धनपूर्णिमायाय स्य द्वयस्य द्वयोनि वामे इति सूत्रेणा घृदातत्वा
द्वयशाद्यानि वा सवचनः।निवासस्य वमसा गामवेति सोयः।हि।वाचो अयाधिया

उ०ग्र०
११५
115

अनयानलोपश्छांदसः। अनेनसोमाख्येनकर्मणावयंवाममाजः स्याम॥ धीरिति
कर्मनाम॥ ६॥ उप०। सावित्रोसि। सवितृदेवत्योऽसि। चनोधाः चनोधाः। अभ्यासेनु
यांसमर्थंमन्यते। अतिशयेनअन्नस्यधारयिताअसि। चनइत्यन्ननाम। मयि चनोधे
हि। स्थापय। किंच। यज्ञंजिन्व। तर्पय। भगाययज्ञफलाययज्ञपतिंयजमानंजि
न्व। जिन्वतिः प्रीतिकर्मा। सावित्रदेवायत्वांगृह्णामीतिशेषः॥ ७॥ वैश्वदेवं
गृह्णाति। उप। सुशर्मासि। स्वाश्रयोऽसि। शोभनाप्रतिष्ठाअस्येति। सुप्रतिष्ठानः
महत्साधनसंपन्नः। प्राणोवैसुशर्मासुप्रतिष्ठानइतिश्रुतिः॥ ग्रहस्यान्नरूप
त्वात्। अन्नस्यप्राणहेतुत्वात्। त्वाबृहः प्राणइत्युच्यते। तस्मात् बृहदुक्षायम ११५
हासेनायजगदुत्पत्तिबीजायप्रजापतयेनमोभवितुमर्हसीतिशेषः। नमइत्यन्न
नाम। प्रजापतिर्वैबृहदुक्षइतिश्रुतिः॥ विश्वेभ्यस्त्वा०॥ ८॥ प्रतिप्रस्थातापात्नीवतं

अहं गृह्णाति उप० ॥ हे देव सोम । इन्द्रः ईश्वर इति परमैश्वर्येति तव ग्रहणं अन्यान्
उपोष्वादीन कुर्मःसं । व हुयेयं । किं । तववृ ह्वयति सुतस्य । वृत्रहणमप्यनुज्ञातस्य ।
इन्द्रियावतः । वीर्यवतः पत्नीवतः । पत्नीसंयुक्तस्य । प्रवरणी । तत्संज्ञा स्रुक्कु ॥ संश्रव
शोषेण श्रीणाति । अहं परस्तात् । अवस्ताद् [illegible]स्तात् अस्य जगतः । यच्चैत दंतरिक्षं त
दुत देवा मे पिता माता । अमृत । अमृतं अहं उभयतो ऽधस्तात् परस्ताच्च सूर्यं ददर्श ।
पश्यामि । पूर्वदेवानां परमं गुह्यं तदप्यहं ॥८॥ अग्नेहोतेति । अग्नाइ षग्नावनाए वोः अग्रग्ट ह्यस्या
दूरा कृते पूर्वस्या ईस्पादुत्तरस्य हुताविति श्रुतः । हे अग्ने पत्नीपुत्रे त्वं त्वष्ट्रा देवेन सहः
समा । प्रीतिः सन् सोमं पिब । पत्नु ज्ञातारं । अवेह तेयः त्वं प्रजापतिः । दक्षो रेतसः ।
सेक्ता । रेतोधारे तस्योभाव पिता । असि । सत्वं मयि रेतोधेहि । प्रजापतेस्त्वोरेतोधसः
स्नवत्स्वभूतं धे तोधां पुत्रं अहं अशीय वद्या ह्नुयां ॥९॥ हारियोजनं गृह्णाति उप० ॥

उ॰अ॰८
११६
116

हरिः हरितो वर्णोऽस्मिन् हरीः रश्मि हरिः सोमो हरितवर्ण इति यास्कः । हारियोजनः ॥ इन्द्रस्यौ
हरी इति श्रुतिः ॥ हरिभ्यां ... स्तोम इति शेषः । धाना अवपति । हर्यश्विरिं द्रास्वयोर्धाना
स्थः ॥ पृथंस्व हस्सोमाः । सोमेन सह ... यमभक्षय ॥ ११ ॥ प्राणभक्षं स्तौति । यस्ते
यस्ते अश्वसनिरिति प्राणभक्षं भक्षयित्वा तरयो वेदोनि वपति । आघ्राणं प्राणभक्षः ।
यस्तवाश्वसानिः । सनोतीत्यश्वसनिर्भक्षः । गोसनिर्भक्षः । गोसनिश्चयः । गाः सनोतीति
तस्य ते तवाहं भक्षयामि उपहूतोऽनुज्ञातः सन् । किंभूतस्य ते । इष्टयजुषः । इष्टानि य
जूंषि यत्र स्तुतः । सोमाय यत्र । शस्तानि उक्थानि यत्र । उपहूतस्यानुज्ञातस्य । तस्मिन्ना
सर्वं क्रियते ॥ यजूंषि इज्यन्ते । स्तोमाः स्तूयते उक्थानि शस्यन्ते ॥ शाकलाज्ञानं । देवकृ ११६
तस्य । अत ऊर्ध्वं यज्ञिनोऽशनार्थः । देवादिविषये कृतस्य एनसः पापस्य अवयजनमसि
किं बहुना । एनसः एनसः सर्वेषां पापानां नाशनमसि । यच्चाविद्वान्वाऽहं एनश्चकार ।

तस्य सर्वस्य नाशनमसि ॥ १३ ॥ वमस्मानभिमृशाति । संवर्चसा व्याख्यातः ॥ १४ ॥ नव । समिद्धय
नूं जिह्नु होति । समिंद्राणः इत्याद्याः षट् त्रिष्टुभः । तत्र तिसृभिर्यजमानमाप्याययति । तिसृभिर्देव
ताव्यवस्थ तति । सं । संडपमर्गः । नेनीत्यनेनसंवध्यते । इंद्रः । नः । हे इंद्र मघवन् । त्वं नोऽस्मा
भनश्वादिभिः संनेषि । संगमयसि । गोभिर्वीरैः पशुभिर्वा । सूरिभिः पंडितैः स्वस्त्या अवि
ताशनेन । देवकृतं । देवै दृष्टं यत्त्वयील ब्रह्मणं ब्रह्मत्र अस्ति नित्यं । तेन ब्रह्मणा च । यज्ञिया
नां यज्ञसंपादिनां देवानां समतौ शोभनया मत्या । तृतीयाविपरिनामः । तस्य तवेत हविः ।
सुकृतमस्त्विति शेषः ॥ १५ ॥ सवर्चसा ॥ १६ ॥ आतारतिः । षट् दृष्ट देवता अस्या मंत्र । विधा
ता । सविता । प्रजापतिः । अग्निः । त्वष्टा । विष्णुः । एते षट् निक्षिपा देवाः । इदं समिद्धय नुर्ल
क्षणवाति हीनं नुमतां । सवर्ता । नुविजित्वाय प्रजया संरराणाः । यजमान संवे छिन्नः संरम
माणाः । यजमानाय द्रविणं दधात ॥ दधतु ॥ प्रथमपुरुषस्थाने मध्यमः ॥ १७ ॥ सुगावः ।

ऋग्वे० स्ट६ ११७ 117

हे देवाः वः युष्माकं। सुगा सदना। सुगमनी यानि सदनानि स्थानानि वयं अकर्म कृतवंतः।
ये यूयं इदं सवनं प्रति जुषाणाः। यज्ञं सेवमानाः संतः आजग्म। आजग्मुः आगताः। अथ यज्ञे
समागते हे वसवः। वासयितारः। यूयं हवींषि भरमाणा वहमानाः संतः अस्मे अस्मासु
पांसुलु गितिशे आदेशः॥ वसूनि धनानि धत्त। ये नु रथिनस्ते हवींषि भरमाणा वहमानाः
ये अरथिनः स्तेस्के वे हवींषि वहमानाः॥ १८॥ देवान् व्यवस्तजति। यो आवह। अग्निरुच्यते।
हे देव अग्ने त्वं यान् उशतः कामयमानान् देवान् आऽवहः। आहूतवानसि। तान् स्वे सधस्थे
स हस्थानेगृहे प्रेरय। किमुक्तेति वेदत आह। ये विश्वे सर्वे यूयं जनित्रिवांसः। पशून् पुरोडाशं
वपपिवांसः सोमं॥ तइदानीं यज्ञे समाप्ते असुं प्राणं वातं [redacted] मं आदित्यं स्वर्कलोकं। अनुया ११६
तिष्ठत। यस्य यत्रगृहा इत्यभिप्रायः। अनुत्वं दाणे वयंहि। वयमेवा इह मंत्रेत्वां। होतारं आ ११७
वृणीमहि। वृतवंतः। त्वं च वृतः सन् समधकु सधगिति निपातः। सत्यार्थो। स भुवनस

मर्द्धयन्त्र्ययाः अयाक्षीः इष्टवान् । असि । उत अपि च अमवकु सन्न अशमिष्ठाः । यज्ञप्रायश्चि
त्तं शमितवानसि । इदानीं यज्ञं परिसमाप्तिं प्रजानन्नवगच्छं उपयाहि । विज्ञानस्वाधिकारं ॥२०॥
देवागातु । व्याख्यातः ॥ २१ ॥ यज्ञं व्यवसृजति । यज्ञ यज्ञं हे यज्ञ सुवा । हे यज्ञ त्वं यज्ञं त्वामेव गच्छ ।
न हि त्वत्तोऽन्यदस्ति सर्वात्मा त्वमिति । अभिप्रायः । यज्ञपतिं यजमानं स्वां योनिं च गच्छ । द्रव्यं
देवताहि यज्ञस्य स्वा योनिः । हे यज्ञपते एष तव शरीरभूतो यज्ञः ऋत्विग्भिः संस्कृतः ॥ तं जु
षस्व । सहसूक्तवाकः । सांगः । सर्ववीराय यस्मिन्न सा सर्ववीरः । सोमः पशुः सवनीयाश्च पुरोडा
शाः क्रतवस्तिर्गाणामेव लंबात्वा लेप्रास्यति । मा हिंसीः । वा चयति । उरुं हि । वारुणस्त्रिष्टुप्
। उरुं तावत् वरुणः राजा सूर्याय सूर्यस्य पंथां पंथानं । अन्वेतवे तमर्थे इत्यादिना तवे प्रत्य
यः । अन्वहमागमनाय हि । अतिशयेन । उरुं विस्तीर्णं चकार । उ अपरं । अपदे यत्र पदं दर्त्तुं
प्रतिमुञ्चन्न्यायेन नोपलक्ष्यते तस्मिन् । अपदे पादाधिधातवे । अंतरिक्षे पादप्रतिधातवे पादानां प्रति

डपाः सुलुगिति षष्ठीबहुवचनस्य आकारः । तुमर्थे तवे प्रत्ययः १

उ॰ अ॰ ८ ११८

निधानाय सूर्यस्येव अर्कः। विकरणव्यत्ययः। कृतवान् अवलंबनमिति शेषः। उत अपि वा।
हृदयाविधश्चित् न हीव्यतीति दीर्घः। अपवक्ता। चित् अपार्थे। हृदयोर्थे। विध्यति मर्मा
णि अपार्थे तस्यापि अपवदिता। आ द्वेष्टा। विमुतान्ये आमयुक्तकारिणां सर्वरूपाणि वम
थापती ऋंददान्विति शेषः। अपो वेष्टमयते। वाचयति प्रवेशः। नमो वरुणाय। वरु
णस्य पाशः अभिष्ठित आक्रांतः। नालं बंधनया॥२३॥ समिधं प्रास्याभिजुहोति।
अग्ने इति ज्ञेयं। अग्नेरनीकं। आग्नेयी त्रिष्टुप्। अग्नेरनीकमिति परोक्षा। इदमेद मेसमि
धं पश्यग्ने इति प्रत्यक्षा। अत एवं व्याख्यायते। यस्य तवाग्नेः अनीकं मुखं। अपां न ११८
पात्संज्ञकं अपउदकं आविवेश। असुर्यं असुरस्य सत्वं मायादिकं प्रतिरक्षन्।
सत्वं इदानीं मदे मदे विप्रा अश्मने अविषयानत्राहिवर्द्धनिमवंति। यज्ञगृहे समिधं

यच्छ।संगतीकुरु।आत्मसात्कुरु।यज्ञपतिः।हे सोम हे शोभनाकृत्य।तेह्वत्रीयवब्रणः।स
मुद्रे ते।सोमी विराट्।यदिति निपातो हृदयशब्देन संबध्यते।समानलिंगत्वात्।हे सोम
ते तव यत् हृदयं समुद्रे अप्स्वंतः अपां मध्ये वर्तते।तत्र त्वां गमयामि।तत्रस्थं त्वां च ओ
षधीः ॐ बधयः ऽ तत्र पिब।आपः संविशंतु।किंच हे यज्ञपते।सोमस्य यज्ञस्य सूक्तोक्तौ
शोभनवचनोच्चारणे नमोवाके नमस्कारवचने च त्वां विधेम।विधतिः स्थापनार्थः
॥२५॥ विसर्गस्यापतिष्ठते।अग्नीजं कुंभं सजेत्॥ देवीरापः।पंक्तिर्बृहती वा।अपां सोमस्य
संगतिं वदंति।हे देव्यः आपः एषः सोमो वः युष्माकं गर्भो वर्तते।तासु प्रीतं सा भृतं पितं सु
भृतं सुपुष्टं तं यूयं बिभृत धारयत।हे देव सोम एष ते लोकः स्थानं।तस्मिन् स्थितः त्वं च
शं सुखं च च स्व।अस्मान् प्रति वह।प्रापय।परि वक्ष्व च अस्मात् सर्वा आर्तीः।तस्मि
न्नः शं च धि सर्वाभ्यो ऽपि च न आर्तिभ्यो गोपायेति श्रुतिः॥२६॥ मज्जयति।अग्नीजकुंभं

ऊ०अ० ११८

118

जलोऽवभृथाख्यात्स्नातः समिधमादध्याति। अवभृथं कृत्वा ततोऽनन्तरं यजमानगृहमाग
त्य आहवनीये। हे अग्ने देवानां देवीभूतानामस्माकं सन्निधनं त्वमसि॥ २७॥ इतउत्तरं
मनुवंध्या यदि गर्भिणी स्यात्तत्र प्रायश्चित्तिरुच्यते। आतिष्ठेत्येतस्मात्प्राक्। निरूप्य मा
णो गर्भमभिमन्त्रयते। एवमसानाम महापंक्तिः। एजतुः। एजतु कंपनं। दशमास्यं दश
मासान्कालावधिमिह इव गर्भो जरायुणा सह चलतु। जरायुर्गर्भवेष्टनं। उपमां
दर्शयति। यथायं वायुः समुद्रश्च एजतु इति। एतौ हि सदा चलनौ। न मेत दप्यद्धा
मास्यं संतां। ब्रह्मणैव यजुषा दशमास्यं करोतीति श्रुतिः। एवमयं दशमास्यो जरायुणा
सह अस्रवत। अस्रवत। स्रंसतः स्रवतु व कृ पं। संसतु स्रवतु वा॥ २८॥ अवदानान्यप्सु
होति। यस्यैते। अनुष्टुप्। वपा प्रोच्यते। यस्यास्तव गर्भा यज्ञियाय जाहिः॥ यस्याश्चयो
निर्हिरण्मयी हिरण्मयी क्रियते। ब्रह्मणा यजुषा। तं त्वां गर्भेण संगमयामि। यस्य ११८

यगर्भस्यांगानि। अकृतानि। अकृतानि अखंडितानि। कृ कृते ७ छंदसीति कुरादेशः। तं गर्भं मा
त्रा। अनुवंध्यालब्धकल्ययास मज्ञीगमं। संगमयामि॥ २८॥ अध्वर्युरिन्दुहोममेवं जुहोति। ग
र्भस्य यज्ञा हीरसो मेधश्च पुरुदस्म ८। गर्भः स्तूयते। इंदुः संस्तवनेन। पशो र्हि सोमस्य संस्तवो
विद्यते। इंदुः सोमः। अंतः उदरे स्थितो महिमानं महाभाग्यं। आनंजा। अंजनं व्यक्ती
करणं। स्थितं दूपं व्यक्तीकरोति। किं। इंदुः। पुरुदस्म ८। बहुदानः। विश्वरूपः। ब
हुरूपः। धीरः। मेधावी। कीदृशं महिमानं। येन एकपदीं द्विपदीं त्रिपदीं चतुष्पदीम
ष्टापदीमपि वशां। अनु। भुवनानि। प्रथंतां। कथमियं वशा चतुःपदी सती एकप
द्यादिभिः मेदैः स्तूयते। अवयुत्येति ब्रूमः। वशेत्येकपदी। वपयांगेभ्यो द्विपदी। उपप
ष्ठो मेधा त्रिपदी। पत्नीसंयाजैश्चतुर्भिर्विपदे चतुष्पदी। गर्भपादैरष्टापदी॥ २९॥

ऊ.अ.टी. शामित्रग्नौ गर्भं जुहोति। मरुतः। मारुतं गायत्री। हे मरुतः यस्य क्षये गृहे यूयं पाथपि
बथ। दिविनिश्चितं। सोमं पापाने। शपोलुक्। हे दिवो विमहसः। द्युलोकस्य पूजयितारः
१२० सजूनः सुगोपातमः। सुगुपातमः। युष्मद्दुपानां न भयमस्तीति भावः॥३१॥ गर्भेश्चि
गारैरभिसमूहति। महीद्यौः। द्यावापृथिवी गायत्री। महती द्यौः पृथिवी च नोऽस्मा
120 कमिमं यज्ञं मिमिक्षतां। सिंचतां। भरीमभिर्भरणैर्हिरण्यपशुधान्यादिति नोऽस्मान्
पिपृतां प्रीणयतां। समानोऽग्निष्टोमः॥३२॥ अथ षोडशी॥ अग्ने पवस्वेत्येतस्मात्स्वा
कू। आतिष्ठ। तिस्र ऐन्द्र्योऽनुष्टुभः। हे वृत्रहन् रथं आतिष्ठ। आरोह। ब्रह्मणा त्रयी १२०
लक्षणेन ते तव हरी अश्वौ युक्ता। नियुक्तौ। तौ हि आवहनानी अस्यापश्चात्यप्राप १२.
आवयोर्नियोजनकाल इति मत्वा स्वयमेवात्मानं रथे नियुंजाते। अतएवोच्यते।

युक्तातेब्रह्मणेति। अथ ग्रावा सोमाभिषवकारी हे इंद्र ते वत मनः वग्नुना सोमाभि
षवध्वनिना अर्वाचीनं अस्मदभिमुखं। सु साधु। कृणोतु। वग्नुरिति वाङ्नामसु
पठितं॥ उप०॥ षोडशिन त्वां गृह्णामि। सादयति। एतत्तोऽस्य॥ अथ द्वितीयो ग्रहम
त्रः॥ युक्ष्वा हि। हे इंद्र हि यस्मात्त्वं हरी युक्ष्व। युजिर् योगे॥ नियोजय। हरी
तव एव वश्वौ। किंभूतौ। केशिनौ। प्रलंबकेशरौ। वृषणौ वर्षितारौ। वृषसेव
ने अस्मात् कनिन्युवृषजीत्यादिना। कनिन्। वाघपूर्वस्य निगमे इति विकल्पे वा
दुपधादीर्घाभावः॥ सुपां सुलुगिति आ इत्यस्य आकारः। वृषणात् पूरणे। कद्रय
प्रा अभ्यस्य मन्वाह ऋजुः। कलात् द्रवं कद्र्यं। तत् पूरयत स्तो। प्रा पूरणे इत्यस्मा
दातों। नुपसर्गे इति कप्रत्ययः॥ तोरष्येयुक्तो तमास्छाप्य। अथानंतर हे इंद्र सोम

ऋ॰अ॰टी॰
१२१

पास्त्वंनोऽस्माकंगिरांउपश्रुतिंवावामुपश्रुत्या।चरअस्मद्दहंगच्छ।उप०।अस्तु
तिलक्षणानांवाणीनांश्रवणेनतृतीयार्थेद्वितीया॥३४॥तृतीयोमंत्रःविक
ल्पः।इंद्रमिद्धरी।इत एवार्थो।हरीइंद्रमेववहतः॥अत्रअकसामेहरीइ एव
तिश्रुतेर्द्विवचनांतहरिशब्दस्यअकसामवाचकाद्धरितवर्णिवश्वा।इं
द्रमेववहतइतिनघटते।तयोःसर्वत्रसुलभत्वात्।पशवोवैदेवानांछंदां
सीतिश्रुतिपर्यालोचनयानानावर्णच्छंदोमयेअकुमामेएतंइंद्रंवहतइति
युक्तंननुहरितवर्णाश्वो।विं।इं।इं।अप्रतिध्वस्तशवसं।नप्रतिधर्षयितुं १२१
वाक्यंशवोबलंयस्यतं।घुवहतः।अक्षीणंस्तुतीःउपसमिपे।मनुष्या
णांयज्ञं।उपवा।उप०॥३५॥षोऽशीग्रहमुपतिष्ठते।यस्माज्जातःऐंद्र

त्रिष्टुप्॥ षोडशी परब्रह्म स्वरूपेण स्तूयते। यस्मात् अन्यः परः उत्कृष्टो ऽमात्तो नास्ति
महित्वेति शेषः। यश्च विश्वाः सर्वाणि भुवनानि आविवेश। आविशति। अन्तर्यामि
तया। यः सर्वेषु भूतेषु तिष्ठन्निति श्रुतिः॥ यश्च प्रजया संरराणः संरममाणः
क्रीडन् प्रजापतिर्भवति। सोऽयं षोडशी ग्रहः॥ त्रीणि ज्योतींषि अग्निर्वायुसूर्य्य १
लक्षणानि सचते सेवते। परमात्मरूपेण॥ ३६॥ षोडशीनं च मद्धयति। इंद्रश्च
त्रिष्टुप् यजुरनी॥ [illegible] प्राणेन तिर्यजुः। इंद्रवरुणौ देवते। षोडशी ग्रहो वा। इंद्रश्च सं
म्राट् यो वाजपेययाजी। वरुणश्च राजा। यो राजसूययाजी। चकारौ समुच्चयार्थौ। राजा वै
राजसूयेन स्वाराट् भवति सम्राट् वाजपेयेनेति श्रुतिः। तौ इंद्रावरुणौ। हे षोडशिन् सह तव द
त्तं भक्षं अनुकुर्वन्। अहं भक्षयामि मदीयेन च भक्षेण न सोमस्य पुष्पाणि। सोमं सेवमाना
वाग्देवी प्राणेन सह तृप्यतु॥ ३७॥ ॥ ॥॥

ऋ० रु०

१२२

अतिग्राह्याख्यस्य ग्रहणे मंत्राः ॥ अथातिग्राह्यपुरोऽनुवाक्या गायत्र्यः । यथा गृह्य-
न्त्यते सा पुरोक्‌ इति संज्ञा । अग्निं इन्द्रसूर्य्य देवत्याः । अग्ने पवस्व । हे अग्ने अस्मे सुप-
सुस्तुगिति शेषः । देशः । अस्मासु वर्चः । त्वं वर्चसं सुवीर्यं साभन वीर्यं च दधत् धा-
रयन् मस्मन्मह्य रयिं धनं पोषं च पवस्व । प्रवर्त्तयस्व । पवतिः प्रवृत्त्यर्थः । न सीवि-
तणएषः । किं भूतः स्वपाः सुकर्मा अप इति कर्मणो नाम । उपयामामन्त्रमेवः । अग्ने व-
र्चस्विन् । हे अग्ने वर्चस्विन् । त्वं यथा देवेषु वर्चस्वान् असि एवमहं मनुष्येषु वर्च- १२२
स्वान् भूयासं ॥ ३८ ॥ उत्तिष्ठन् । हे इन्द्र त्वं मार्कं सं गान ॐ जसा बलेन सह उत्ति-
ष्ठन् च मूसु वच मेणा भिषुतं सोमं पीत्वा पीत्वा स्नात्वा दय अश्चाति निपातः ।
शिप्रे हनू नासिके वा अवेपयः । हु वेपकंपने । अतिपानवशात् कंपितवानसि ।

अभिश्रवणे वर्म्म च मृशाह्नेनो यतोऽपं० ॥ प्रगुणं गृह्णं भक्षयति । इंद्रः ऽ ति जो वति
घ्नः । शेषं पूर्ववत् ॥ ३८ ॥ अदृश्रं । हविषि रप्रेक्षणे । अस्य कर्म्मणि प्रथमपुरुषवद्भुव
चन स्थाने अदृश्रमिति छांदसं रूपं । अस्य सूर्यस्य केतवः केतुरिति प्रज्ञा नाम प्र
ज्ञानकराः रश्मयः जनान् अनु अग्नयो यथा अग्नयः उज्ज्वलंतो दीप्यमानाः वि अदृ
श्रं । विदृश्यंते ऽपं० ॥ भ्राजंति सूर्यः ॥ ४० ॥ समाप्तः षोडशी ॥ ॥ अथ गवामयन
ना ॥ ।विषुवति ग्रहं गृह्णाति । विषुवत्संज्ञके अहनि गवामयने हय हणे विनि
योगः । उदु त्यं । व्याख्यातं ॥ ४१ ॥ अथ सोमस्य हिरण्मये भि र मंत्रणे । द्वाभ्यामृग्भ्यां म
हापंक्तिप्रस्तारपंक्तिभ्यां । द्रोणकलशमवघ्रापयति । आजिघ्र । कौस्तुरुविं दो
रा जं । हमघे नो । त्वे द्रोणकलशं आजिघ्र । किं वा इंदवः सोमा द्रोणकलशमाः

ऋग्वे० १२३

त्वांश्चाविशंतु। किंच पुनरपि जठरे अन्नेन पूर्णा अस्मान्प्रति निवर्तस्व। ऽरुधारा व
सुधारा पयस्वती सा त्वं नोऽस्माकं सहस्रं गवां यदस्माभिर्दत्तं तद्दुग्ध्वा देहि। दुहति
दोहनार्थः। मयि वर्धनं पुनर्मां आविशतात्॥ ४२॥ दक्षिणे ऽस्याः कर्णे यजमानो ऽनुपठति
इडे रंते। हे इडे मनुदुहितः तुल्यो रंते रमयती विरता। हव्ये। हूयते ऽस्या विकारा यज्ञे
ष्विति हव्या। काम्ये। मनुष्याणां मतास्सु कामाः प्रविष्टाः। चंद्रे। चंद्र इव आह्लादयतीति
चंद्रा। ज्योतिर्ज्योत्स्ना। घृतदीप्तौ। अस्याः ज्योता। बाध्य दिति। अदिति। अखंडिता। १२३
अदीते। सरस्वति सर इत्युदकनाम तद्वती। महि। महति। विश्रुति। विविधं श्रूय
त इति विश्रुति। अघ्न्ये। अहंतव्ये॥ तव एतानि नामानि। तैरभिहिता त्वं देवेभ्यो मां
सुकृतं सुकृतकारिणं ब्रूतात् ब्रूहि॥ ४३॥ महावीरीयं अहं गृह्णाति। महाव्रतसंसेके
ऽहनि। विन इंद्रा अनुष्टुप् इंद्रो विमृधः सुएष्टुतो देवता।

हे इन्द्र नोऽस्माकं मध्ये संग्रामयान् विजहि। नाशय। किंच। पृतनाः संग्रामानि छंतितेषु
न्यंतः तान् मनुष्यान् नीचावयथा नीचैर्निगृह्णीष्व। यश्चास्मान् अभिदासति। उपक्षिप
ति। वस्तुउपक्षेपयति। तं अधरं निकृष्टं तमः गमय। उप०॥ ४४॥ द्वितीयो मंत्रविकल्पः। वा
चस्पतिं। त्रिष्टुप्। विश्वकर्म्मणी। मनो विश्वानीति न दः श्रवणाद्युदोः ध्याहारः॥
नित्यसंबंधो हियत्तदोः। यं विश्वकर्म्माणं वयं अद्यास्मिन् दिने हुवेम। आह्वयामः॥
किमर्थं। वाजे। महाव्रतीयलक्षणे यज्ञे। ऊतये अवनाय तर्पणाय॥ किंभूतं। वाचस्प
तिं। प्राणरूपेण। मनोजुवं। मनोगतिं। सः नोऽस्माकं विश्वानि हवनानि जोषत्। जु
षतां। किंभूतः सः। विश्वशंभूः सर्वस्य सुखेन भावयिता। अवसे अन्नाय साधुकर्मा। अ
वस इत्यन्ननाम। उप०॥ ४५॥ अपरो मंत्रः विकल्पः। विश्वकर्मन्। त्रिष्टुप्। ऐंद्री
विश्वकर्म्मणी वा। हे विश्वकर्मन् वर्द्धनेन वर्द्धयित्रा हविषा महाव्रतीयलक्षणेन।

इंद्रं आरंभवतः। अवध्यं यच्च कृण्णोः कृतवानसि। तस्मै इंद्राय पूर्व्वीः पूर्व्व वसिष्ठप्र
भृतयो विशो मनुष्याः समनमंत सम्यग्नताः। इदानींतना अपि यथा। पंचम्यर्थे
थाप्रत्ययः। अतः कारणात् अयं इंद्रः उग्रः उद्गूर्णवज्रः विहव्यः विविधेषु कार्य्ये
षु आहूयत इति विहव्यः। अससत् अभवन्। हे विश्वकर्म्मन् त्वं हविः सामर्थ्यादिंद्र
स्यांयं प्रमोवहत्यभिप्रायः॥ ५॥ ४६॥ अदाभ्यं ग्रहं स्तौति। देवानामसौंऽपयामः
। अग्नये गायत्रछंदसं त्वां गृह्णामि। एकं ग्रहं। इंद्रायेति द्वितीयं ग्रहणं। विश्वेभ्यः
ति तृतीयं ग्रहणं। एवं सवनदेवताभ्यः स्वछंदसं सोमं गृह्णीत्वाऽथाह। हे सोम
अनुष्टुप्। ते तव अभिगरः अभिष्टवः त्वत्स्तुतो यद्वाऽउ द्दुं सवनेभ्यस्तदानुष्टुभम्
मिति श्रुतिः। अहपात्रस्थासु निग्राभ्यासु अंशूना पूनोति। सोमस्य वंशानां। [illegible]शीनां १२४

त्वा। मेघस्य व्रजतः उदरे शेते रजति प्रेश्यो मेघस्था आपउच्यंते। हे सोम वृषेशीनां अपां
